श्रीगणेशायनमः

तुलसीतत्त्वभास्कर

श्लोक

वज्रांगंवज्रदंष्ट्रं खल दववदहनं कोटि सूर्य्य प्रकाशं
रुद्रं ब्रह्मादिसेव्यं दशमुख भयदं कांचनाभं कपीशम्
पिंगाक्षंपीत वस्त्रं पवन समजवं रामदूतं प्रसन्नम् लंका
वंकप्रदंतं कपि कुलतिलकं वातजातं नमामि ॥ सीतापते
शारंनत्वा शार्ङ्गं चापि शरासनम् कुर्वे वैष्णव तुष्ट्यर्थं तु-
लसीतत्वभास्करम् ॥

श्रीमत्परम हंसपरिव्राजकाचार्य्यतारक ब्रह्मानंद सरस्वतीपंडि-
तस्वामि शिष्य विशुद्धानंदसरस्वती स्वामिनासंमतोऽयमर्थः१
श्रीमत्परमहंस परिव्राजका चार्यतारक ब्रह्मानन्द सरस्वतीपं-
डितस्वामिशिष्य विश्वरूप स्वामिना सम्मतोऽयमर्थः २ तर्कपं-
चाननो पनाम कानांश्रीजयना रायण शर्म्मणा सम्मत मिदं३।
अत्रार्थेश्रीविश्वेश्वर दत्त शर्म्मणः सम्मतिः ४ ॥ अर्थोऽयं स-
म्मतो विद्वच्चंद्र शेखर शर्म्मणाः ५॥ मन्यते ऽमुमर्थं देवदत्तश-
र्म्मासुधीः ६॥ वैष्णवैर्नित्यं तुलसीमाला धार्य्यै वेत्यत्र सम्मतिः
सरलाराम भट्टानाम ७॥ सदातुलसी काष्ठमालधारणे द्विवेदोष

नामक पण्डित रक्षपाल शर्म्मणः सम्मतिः ८॥ सम्मतिरत्र श्री मद्विवेणीनि वासिसशिव सहाय शर्म्मणः ९॥ कृतसम्मतिकोऽत्राद्धि वेद बस्तीराम शर्म्मा १०॥ वैष्ण वागमोक्तदीक्षा वद्भिर्भोजनादिसर्व कालेपितुलसीमाला धार्यं वनस्यान्येत्यत्र सम्मतीराजाराम शास्त्रिशर्म्मणः ११ वैष्णवागमोक्तदीक्षा वद्भिर्भोजनादिसर्व कालेपि तुलसीमाला धार्य्यं वनस्यान्येत्यत्र सम्मतिर्वाल शास्त्रिणः १२ एवं वासुदेव शास्त्रिणोऽपिसम्मतिः १३ एवं पंडित यागेश्वर शर्म्मणोऽपिसंमत्तिः १४॥ गोविन्द देव शास्त्रिणश्च ॥१५॥ वैष्णवैर्नित्यं तुलसीमाला धार्य्ये त्यत्र सम्मतिरनंत रामभट्टानाम ॥१६ सम्मान्य यमर्थस्सु कुलोपपद श्रीधर शर्म्म पण्डितैः १७॥ इममर्थं संमनुत्ते श्रीपण्डित माध्वमतानु यायि माधवाचार्यः १८॥ अत्रार्थे संमतिर्वामना चार्य्याणाम् १९॥

अथ तुलसी माला धारणविधिः हरिभक्तिविलासे श्रीमद्गोपाल भट्टोदाहृत गरुड़ पुराण वचनानि॥ संनिवेद्यैव हरये तुलसी काष्ठसं भवाम॥ मालांपश्चात्स्वयंधत्ते सवै भागवत्तो त्तमः॥ हरयेनार्पयेद्यस्तु तुलसीकाष्ठ संभवाम मालांधत्ते स्वयंमूढ़ः सयात्ति नरकं ध्रुवम॥

कृतसम्मतिरत्राविका दत्त शर्मा २०॥ सम्मतिरत्रार्थे श्रीराधा मोहन देवशर्म्मणाम २१॥ सम्मत्तिरत्रार्थे कालीप्रसाद शर्म्मणाम् २२॥ सम्मतिरत्रार्थे हरिकृष्ण शर्म्मणः २३ ममसंस्तामुमर्थं द्विवेदोपाह्वभैरवदत्त शर्म्मा २४॥ सम्मान्य यमर्थो द्विवेदोपाह्व हरदत्त शर्म पण्डितेन २५ सम्मतिरत्रार्थे देव बरोपाह्व नारायण शर्म्मणः २६॥ सदा तुलसी काष्ट माला धारणेगोपाल शा-

 ملتی تبت صاحب مکر

र्म्मणः २७॥ संमत्तिरत्रार्थे वारस्करोपाह्व कृष्णशर्म्म शास्त्रिणः ॥ २८॥ अत्रार्थे विराट्क्षेत्र वासि स्थपा वित्ते पाह्व दीक्षित यज्ञेश्वर शर्म्मणः २९ सम्मत्तिरत्र गणेश शास्त्रोत्तिनः ३०॥ सम्मत्तिरत्र रामचंद्र शास्त्रिणः ३१ सम्मत्तिरत्र घनश्याम शर्म्मणः ३२ सम्मत्तिरत्रार्थे पण्डितवेचनराम शर्म्मणः ३३ सम्मत्तिरत्र शीतलप्रसाद शर्म्मणः ३४ अत्रार्थे सम्मत्तिः श्रीविश्वनाथ शर्म्मणः ३५ सम्मत्तिरत्रार्थे श्रीकैलासनाथ शर्म्मणः ३६ अत्रार्थे कृतसम्मत्तिः श्री प्यारे शर्म्मा मिथिलाधीशसम्मानिनः ३७ सम्मत्तिरत्रार्थे देवकृष्ण शर्म्मणः ३८ सम्मत्तिरत्र हरिशरणशर्म्मणः ३९ सम्मत्तिरत्रार्थे श्रीश्रीपति शर्म्मणो वेत्तीयेषा पण्डितस्य ४० सम्मतोऽयमर्थो द्विवेदि श्रीरमापत्ति शर्म्मणः ४१ सम्मत्तिरत्रार्थे विद्याधर व्यासस्य ४२ सम्मत्तिरत्रार्थे व्यासोपनाम कस्यपरमेश्वर दत्त शर्म्मणः ४३ सम्मत्तिरत्रार्थे वलदेव शर्म्मणः ४४ कृतसम्मत्ति कोऽत्र पांडेयोपाह्व जानकी प्रसाद शर्म्मा ॥४५॥

क्षालितां पंच गव्येन मूलमंत्रेण मंत्रिताम् ॥ गायत्र्या चाष्ट कृत्वो वै मंत्रितां धूपयेच्च ताम् विधिवत्परया भक्त्या सद्योजातेन पूजयेत् ॥ तुलसीकाष्ठ संभूते माले कृष्ण जनप्रिये ॥ विभर्मि त्वा महं कंठे कुरु मां राम वल्लभम् ॥ यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ॥ तथा मां कुरु देवेशि नित्यं विष्णुजनप्रियम् ॥ दानेन धातु रुद्रिष्ट्वा लासि माहरि वल्लभे ॥ भक्तेभ्यश्च समस्तेभ्य स्तेन माला निगद्यते ॥ एवं संप्रार्थ्य विधिवन्मालां रामगलेर्पिताम् ॥ धारये द्वसंवो यो वै स गच्छे

द्वैस्तवं पद्मम् ॥ अथमाला धारण माहात्म्यं तत्रैवस्कान्दे ॥ धात्रीफल कृतामाला तुलसीकाष्ठ सम्भवा ॥ दृश्यतेयस्यदेहे तुसवै भागव तोत्तमः ॥ तुलसीदलजांमालां कंठस्थांवहते तुयः ॥ विष्णूत्तीर्णां विशेषेणासन मस्योदिवौकसाम् ॥ तुलसी दलजामाला धात्रीफलकृतापिच ॥ ददातिपापिनां मुक्तिं किंपुनर्विष्णुसे विनाम् ॥ तत्रैवगारुडे ॥ तुलसी काष्ठ संभूतां योमालांवहतेनरः प्रायश्चित्तं न तस्या स्तिनाशौचं तस्यविग्रहे ॥ तुलसीकाष्ठ माला भिर्भूषितो भ्रमतेयदि दुःस्वप्नंदुर्निमित्तं चनभयं शस्त्रजंक्कचित् श्रुतिप्रकाशिकादा हृतैर्यज्ञोपवीतवद्धार्यासदा तुलसिमालिके त्यादिवचनैश्च तुलसी मालायाः सर्वदाधारण मेवयुक्त मितिसिद्धान्तः ॥ यत्तुतुलसीनलिनाक्षकारेण ॥ तुलसीचयथा लक्ष्मीर्लक्ष्मीश्च तुलसीतथा ॥ नभेदोस्तितयोः कश्चि तस्मात्स्नात्वैवधारयेत् ॥ स्नानकालेयदाकंठे तुलसीदामभूषितः ॥ तद्वारिपादोपत्तेतिस पापिष्ठोनराधमइति वृद्धशांडिल्य वचनम् ॥ भोजने शयने चैव मलमूत्र विसर्जने तुलसीकाष्ठ माला या धारणात्पतितोभवेत् ॥ अरण्येलघुवाधायांमैथुने क्षौरकर्मणि ॥ तुलसीकर्णकंठस्य ब्रह्महत्यापदेपदे ॥ तुलसीं धारयन्कंठे मलमूत्र विसर्जने ॥ नरकेपच्यते मूढो यमदण्डे नपीडितः ॥ तुलसीमालिका नित्यं धारणीया प्रयत्नतः ॥ धारयेच्च विशेषेण जप होमार्चनादिषु ॥ तुलसीं देवपूजायां जप काले

Digitized by Google

तथैव च ॥ पूजने स्मरणे चैव अन्य कालेन धारयेत इत्यादि
वामन पुराण वचनानि ॥ पूजाकाले हरिध्याने संध्याया
वंदनेतथा ॥ तुलसीधार्यतेकंठे महाभागवतोत्तमैरिति वृह
द्भारद्वाज संहिता वचनंच ॥ तुलसीकाष्ठ मालां यस्त्व शौ
चेच वहेन्नरः श्वैवस्मवः सविज्ञे यो महापातकवान्भवे दिति
वृद्ध शाण्डिल्य वचनंच ॥ भोजने शयने चैव मलमूत्र विस
र्जने ॥ तुलसीमालिकांधत्तेप तत्यैव नपंशय ॥ अरण्ये
लघुवाधायां तैलाभ्यं गेच मैथुने ॥ तुलसी कण्ठ कंठेच ब्रह्म
हत्यापदेपदे ॥ इति ब्रह्मांड पुराण वचनं चोपन्यस्य सर्वदा
तुलसीमाला धारणस्य निषेध उक्तस्तन्न प्रामाणिक नि
बंधेषु तेषामदर्शनेन ॥ तद्विरुद्ध वचनानां दर्शनेनचैते
षांकल्पित त्वात् ॥ तथाच हरि भक्ति विलासे श्रीमद्गोपा
ल भट्ट माध्वोदाहृतम् ॥ एकादशी तत्वे रघुनंदन भट्टा
चार्य स्मार्त्तोदाहृतम जयसिंह कल्पद्रुमे जयसिंहो दा
हृतं गरुड़ पुराण वचनम् ॥ स्कांद वचनंच ॥ तुलसींविना
या क्रियेत न पूजा स्नानं तच्च तुलसींविना कृतं भुक्तं नत्त-
द्यतुलसी विवर्जितं पीतं नतच्च तुलसी विवर्जितम् ॥ स्ना-
ने दाने तथाध्याने प्राशने केशवार्चने तुलसी दहते पापं
कीर्तने रोपणे कलौ ॥ तथाच स्मृति प्रकाशिकोदाहृतस्कां-
द वचनम् तुलसीकाष्ठ मालां यो धृत्वा स्नानं समाचरेत् ॥
पुष्करेच प्रयागे च स्नातं तेन मुनीश्वर ॥ तत्रैव पाद्म वचन

Digitized by Google

मपिस्नान काले तु यस्यांगे दृश्यते तुलसी शुभा॥ गंगादि स-
र्वतीर्थे षु स्नातं तेन न संशय:॥ अलस्य गौरी तंत्रेऽपि॥ स्ना-
नकालेच यस्यांगे दृश्यते तुलसी शुभा गंगादि सर्वती-
र्थे षु स्नानं तस्य न संशय इत्यादि तदुदाहृते॥ स्नानका-
लेयदा कंठे इति श्लोके उक्तायुक्तिरपि विरुद्धा तथाहि॥ य-
दितु तुलसीमाला स्पृष्टजलस्य पादपतना दोषः स्यात्त-
र्हिगंगादि स्नाने पिदोषप्रसंग:॥ पादस्पर्शं विना स्नानासं-
भवात्॥ किंच सर्वदा विष्णुरूप तिलक धारणस्यापि निर्वा-
होन दृश्यते॥ स्नान काले तस्य क्षालन जलस्यापि पादस्प-
र्शकर्तृत्वात्॥ अन्यथा तुलसीदल मिश्रितजलेन स्नान
विधेरप्य संभवः स्यात्॥ पादस्पर्शभयात्॥ तद्धि धिग्दृष्ट्वा
ले रामार्चनचन्द्रिकायाम् स्नान प्रकरणे॥ शालग्राम शि-
लातोयं तुलसीगंध मिश्रितं॥ कृत्वा शंखं भ्रामयंस्त्रिःप्रक्षि-
पेन्निजमूर्द्धनि॥ तथाच हरिभक्ति विलासे॥ श्रीमन्त्रोपा-
ल भद्रोदाहृत शाद्धवचनं॥ द्वारकाचक्र संयुक्त शालग्रा-
म शिलाजलं॥ शंखेकृत्वातुनिः क्षिप्तं स्नानार्थं ताम्रभाज-
ने॥ तुलसीदल संयुक्तं ब्रह्महत्या विनाशनं॥ श्रुति प्र-
काशिकोदाहृतस्कांद वचनंच॥ तुलसी काष्ठमालां यो
धृत्वा भुंक्ते द्विजोत्तमः॥ सिक्थेसिक्थे सलभते वाजिमेध
फलम्मुने॥ तत्रे च गौरी तंत्रेपि॥ तुलसी धारिणं विप्रंयः
श्राद्धे भोजयेत्प्रिये॥ तस्य तुष्यंति पितरोमन्वं तरशताव-

Digitized by Google

धि॥ तुलसी मालिकां धृत्वा यो भुंक्ते गिरिनंदिनि ॥ सिक्थे
सिक्थे स लभते वाजपेयशताधिकम् ॥ दीक्षानंतरमी-
शानियो भुंक्ते तुलसीं विना ॥ तदन्नं शूकरमलं तज्जलं
सुरया समम् ॥ नैवेद्यकालनिय मोनस्थान नियमस्त-
था ॥ विण्मूत्रोत्सर्गपर्वत सुते तुलसी मणिधारणे ॥ तत्रैव पा
द्मे ॥ तुलसीमालिका न्धृत्वा यो भुंक्ते गिरिनंदिनि ॥ सि-
क्थे सिक्थे स लभते वाजपेयफलं शुभम् ॥ बहुना किमि
होक्तेन शृणु त्वं वरवर्णिनि ॥ विडुत्सर्गादिकाले न
त्याज्या तुलसिमालिका ॥ अंतकालेपि यस्यांगं तुलसी
मालिकास्पृष्टमात्र ॥ तस्य देहोद्भवं पापं तत्क्षणात् देव न-
श्यति ॥ यत्कंठे तुलसी नास्ति ते नरा मूढमानसाः अन्नं
विष्ठा जलं मूत्रं पीयूषं रुधिरं भवेत् ॥ तत्तत्सर्वेषु काले
सुधार्या तुलसिमालिका ॥ क्षणार्द्धं तद्विहीनोपि वि
प्रो द्रोही भवेन्नरः ॥ तत्रैव गारुडे ॥ प्रायश्चित्तं न तस्या
स्ति नाशौचं तस्य विग्रहे ॥ तुलसीकाष्ठसंभूतं शिरो वा
हु विभूषणम् ॥ तत्रैव स्कांदेपि ॥ यज्ञोपवीतवद्धार्या कंठे
तुलसिमालिका ॥ नाश्रौचं धारणे तस्या यतस्सा ब्रह्म
रूपिणीति अयं भावः ॥ यथा यज्ञोपवीत त्यागेन ब्रह्म
कर्म विमुखत्वं तथा तस्याः क्षणमात्र त्यागेन भगव-
द्विमुखत्वमिति ॥ अतएव गौरीतंत्रे ॥ यज्ञोपवीत वद्धा-
र्या सदा तुलसिमालिका ॥ क्षणमात्रपरित्यागाद्विमु

द्रोही भवेन्नरः ॥ पुनस्तत्रैव नारदपंचरात्रेन ॥ अशौचे वा
प्यनाचारे काले कालेन सर्वदा ॥ तुलसीमालिकां धत्ते
सयाति परमं पदमिति ॥ हरिभक्ति विलासे श्रीमद्गोपा
ल भट्टमाध्वोदाहृतं एकादशीतत्वे रघुनंदन भट्टाचार्य
स्मार्तोदाहृतं ॥ जयसिंहकल्पद्रुमे जयसिंहोदाहृतं ॥ ग
रुडपुराण पद्मपुराण वचनंच धारयंतिनये मालां हैतु
काः पापबुद्धयः ॥ नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना
हरेः ॥ धात्रीफलकृता मालां कंठस्थायो वहेन्नरः ॥ वैस
वोनसविज्ञेयो विष्णुपूजारतोयदि ॥ जयसिंह कल्पद्रु
मीय भक्ति पुराणस्थ वामन पुराण वचनंच ॥ पूजातुतु
लसीपत्रैर्मया कार्यासदैवहि ॥ तुलसीकाष्ठ संभूतामा
लाधार्यासदाहरेः ॥ श्रुतिप्रकाशिका संरोज सुन्दरोदा
हृतस्मृतिः ॥ तुलसीकाष्ठ संभूतां मालां यो वहते द्विजः
॥ अशुचिर्वाप्यशुचिर्वापि ब्रह्मभूयान्नसंशयः ॥ श्रीमद्गो-
पाल भट्टोदाहृत विष्णु धर्मोत्तर वचनंच ॥ तुलसीकाष्ठ
मालांच कंठस्थांव हतेतुयः अप्यशौचोप्य नाचारो-
मामेवैतिन संशयः ॥ कल्पवल्ल्यां रामचंद्रभट्टेन
अनूप विलासे दीक्षित मणिरामेण विधान पारिजाते
प्रथमस्तवके अनंत भट्टेन हरि भक्ति विलासे श्रीमद्गो
पाल भट्टेन हरिभक्ति भास्करे भुवनेश्वर देवेन ॥ धर्मसा
रे पुरुषोत्तमेन विष्णुधर्मोत्तर वचनं स्कांद वचनंचोदा-

Digitized by Google

हृतं तथाहि ॥ माला युग्मंच यो नित्यं धात्री तुलसिसं
भवं ॥ वहते कंठदेशेच कल्पकोटि दिवंवसेत् ॥ नत्यज-
ह्या तुलसी माला धात्रीमाला विशेषतः ॥ महापात
कसंहर्त्रीं धर्मकामार्थ दायिनीम् ॥ ननुमाला युग्मंच
योनित्यमिति वचनं ॥ नजह्यात्तुलसी माला मितिव-
चनंच ॥ यज्ञोपवीत वद्धार्या सदा तुलसिमालिकेतिव
चनंच ॥ क्षणमात्र परित्यागाद्विष्णु द्रोही भवेन्नरइति
वचनंच ॥ भोजनादि निषिद्ध काल भिन्न क्षण मात्र परि
त्यागात्प्रत्यवाय बोधकमितिचेन्न ॥ भोजनादिकाले
तुलसी धारण निषेध कवच नानाम प्रमाणिकत्वात् ॥
भोजनादि काले प्रामाणिक धारण बोधक वचनानां-
निर्विषयत्वापत्तेश्च ॥ यत्तु येनिवध्नंति तुलसीं कंठे ज्ञा-
नविमोहिताः ॥ सर्वधर्म विनिर्मुक्तास्ते यांतियम साद
नम् ॥ कंठेवध्वातु तुलसीं मिथ्या जल्पंतियेनराः ॥
तेमहापापिनोज्ञेया विष्णुधर्म बहिर्मुखाः ॥ इतिब्रह्मा-
डपुराण त्वेनप्रकल्पितं श्लोक द्वयमुदाहृत्य तुल-
सीमाला धारणं निषिद्धमित्युक्तं तदसत् प्रसिद्ध निब-
न्धेष्वदर्शनात् ॥ तुलसीमाला रहित पुरुषस्य मिथ्या
संभाषण विध्य श्रवणाच्च ॥ निबंधेषु यज्ञोपवीतव-
द्धार्या सदा तुलसि मालिके त्यादि तद्विरुद्ध वचनद-
र्शनाच्च ॥ येकण्ठलग्नतुलसी नलिनाक्षमाले त्यादि

तदुदाहृत वचनैर्विरोधाच्च ॥ नहि तुलसी मालायाः कं-
ठलग्ना त्वंबंधन मंत्तरासंभवति नापिकंठे चंदनादुग्धा
दिलेपनपूर्वक तुलसी गुटिका विन्यासो ऽवलोकितोलो
के ॥ यत्तु तुलसी नत्तिनाक्षकारेण ॥ यत्तुवर्णावहि र्भूता
स्तेषांकी दृशि धिर्मतः ॥ इदानीं श्रोतु मिच्छामि वदत्वं
कृपयाप्रभो ॥ इतिविहगेश्वर प्रश्नोपरि ॥ चक्रादि धार
णांनेषामपि तुल्यं खगेश्वरमंत्रेतु नाधिकारः स्याद्वैदि
के तांत्रिकेपिवा ॥ मन्नाममा त्रंदातव्यं मंत्रोवा वैपरीत्य-
तः ॥ तेषांकंठेतु वध्नीया तुलसी काष्ठ मालिकाम ॥ मं-
त्रप्रतिष्ठितामाला तैर्नधार्या कदाचन ॥ अमंत्रपूता-
मालेवधार्या कंठेसदेव तैरिति विहगेश्वरसं हितावचन
मुपन्यस्य कंठलग्नमाला द्विजातीनां निषिद्धाइ तिद-
र्शितंतन्न ॥ प्रामाणिक निबंधेसु तद्वचनानाम दर्शनेन
तादृश निषेधस्य अप्रामाणिक त्वात्त ॥ कंठलग्नमा-
लायाः शूद्रपरत्वस्वीकारे शूद्रस्यद्विजातेबाधकापत्ते-
श्चतथाहि ॥ मालाद्विविधा एकाकंठलग्ना अपरा ना-
भिपर्यंताकंठलग्नायथा ॥ हरिभक्तिविलासे गोपाल
भट्टेन एकादशीतत्वे रघुनंदन भट्टाचार्येण ॥ जय
सिंहकल्पद्रुमे जयसिंहदेवेन चोदाहृतं नारदीय वच
नम ॥ येकंठ लग्नतुलसी नलिनाक्षमाला ये बाहुला
टफलके लसदूर्ध्व पुण्ड्राः ये वाहुमूल परिचिन्हितशं

स्वच्चकास्ते वैस्मवा भुवनमा शुपवित्रयंति ॥ नाभि पर्यंतायथा पाद्मेकंठादि नाभि पर्यंतान्तुलसी यो वहे न्नरः ॥ कुलकोटिं समुद्धृत्य विस्मुलोके महीयते इति स्पयंभावः ॥ येकंठलग्नमालास्ते शीघ्रंभुवनं पवित्रयन्ति ॥ यश्चनाभि पर्यन्तमालान्धारयतिसः स्वदर्शनमात्र मुद्धारयतीति वहु शेषवलोकि तेष्वे पुनिवंधेसु तुलसीमालिकानित्य धारणा निषेधोनोप लब्ध इतिवोध्यम् निवंधास्तु मनुस्मृतिः १॥ हारीतस्मृतिः २ विष्मुस्मृतिः ३ गौतमस्मृतिः ४ शंखस्मृतिः ५ अत्रिस्मृतिः ६ दक्षस्मृतिः ७ वसिष्ठस्मृतिः ८ व्यासस्मृतिः ९ काश्यपस्मृतिः १० देवलस्मृतिः ११ उशनसः स्मृतिः १२ याज्ञवल्क्यस्मृतिः १३ आचारादर्शः १४ आचारप्रदीपः १५ आचारमयूखः १६ प्रायश्चित्तमयूखः १७ धर्ममयूखः १८ शांतिमयूखः १९ दानमयूखः २० प्रायश्चित्तप्रदीपः २१ प्रायश्चित्तविवेकः २२ प्रायश्चित्तशतद्वयी २३ शुद्धविवेकः २४ स्मृतिसमुच्चयः २५ शुद्धितत्त्वम् २६ आन्हिकनिवंधः २७ अधिकारनिर्णयः २८ भट्टोजी दीक्षितकृततिथिनिर्णयः २९ अनंतदेव कृततिथिनिर्णयः ३० निर्णयामृतं ३१ धर्मसारः ३२ स्मृतिचंद्रिका ३३ स्मृतिकौस्तुभः ३४ स्मृतिसुधाकरः ३५ व्रतार्कः ३६ संस्कारकौस्तुभः ३७ अनूपविलासः ३८ संकल्पकौमुदी ३९ आन्हिकचंद्रिका ४० दानोद्योतः ४१

(मालाप्रक०)

Digitized by Google

पहिनोत्तिवे ॥ तावत्तीब्रह्म हत्यादि छिनत्त्येवन संशयः
तुलस्यांसिंच येद्यस्तु सुलुकोद कमात्रकं ॥ क्षीरोदशा
यिनासार्द्ध वसेदाचंद्र तारकम ॥ कंठकाष्ठरणां वापिवृ
त्तिकाद्यैः करोतियः ॥ तुलस्याः शृणुराजेंद्र तस्य पुण्य
फलं महत्त ॥ यावद्दिनानि संतिष्ठेत्कं ठकावरणंप्रभो
॥ कुलत्रय युतस्ताव तिष्ठेत ब्रह्मपदे युगम ॥ तुलसीति
चयो ब्रूयात्त्रिकालंच दनेयदि ॥ नित्यंसगो सहस्रस्यफ
लमाप्नोति भूसुर ॥ तेनदत्तंहुतं जप्तंकृतं श्राद्धं यथाशि
रे ॥ तपस्तप्तंस्वगश्रेष्ठ तुलसीयेनरो पित्ता ॥ शुक्लप
क्षेयदाराजंस्त्रतीयाबुध संयुता ॥ श्रवणेन महाभा
गतुलसी चातिपुण्यदा ॥ अथ तुलसीमृदः काष्ठस्य
चमाहात्म्यम् ॥ तुलसी मृत्तिकालिप्तोयदि प्राणान्प
रित्यजेत्त ॥ यमेननैव क्षितुंशक्तोयुक्तः पापशतैरपि ॥
शिरसिक्रियते यैस्तुतुलसी मूलमृत्तिका ॥ विघ्नानि त-
स्यनश्यंत्ति सानुकूलाग्र हास्तथा ॥ तुलसी मृत्तिका
यत्रकाष्ठं पत्रंच वेश्मनि ॥ तिष्ठत्ते मुनिशार्दूलनिश्च
लंवैष्णवं पदम् ॥ वृहन्नारदीये ॥ तुलसी मूल संभूता
हरि भक्त पदोद्भवा ॥ गंगोद्भवाच मृल्लेखानयत्य
च्युत रूपताम् ॥ विष्णुधर्मोत्तरेपि ॥ पत्रंपुष्पं फलंका
ष्ठं त्वक्शाखापल्लवांकुरं ॥ तुलसी संभवं मूलंपा
वनं मृत्तिकाद्यपि होमं कुर्वंतिये विप्रास्तुलसीकाष्ठ

बन्हिना ॥ लवेलवे भवत्सुराय मग्निष्टोम शतोद्भवम् ॥ नैवेद्यं पचते यस्तु तुलसीकाष्ठ बन्हिना ॥ मेरु तुल्यं भवे दन्नं तद्दत्तं केशवाय हि ॥ शरीरं दह्यते येषां तुलसी काष्ठ बन्हिना ॥ नतेषां पुनरा वृत्तिर्विष्णु लोकात्कथं चन ॥ ग्रस्तो यदि महापापैर गम्यागमनादिकैः ॥ मृतः शुद्ध्यति दाहेन तुलसी काष्ठ बन्हिना ॥ तीर्थं यदि न संप्राप्तं स्मृतिर्वा कीर्तनं हरेः ॥ तुलसी काष्ठ दग्धस्य मृतस्य न पुनर्भवः ॥ यद्येकं तुलसी काष्ठ मध्ये काष्ठस्य यस्य हि ॥ दाहकाले भवेन्मुक्तिः पापकोटि युतस्य च ॥ जन्मकोटि सहस्रैस्तु तोषितो यैर्जनार्दनः ॥ दह्यंते ते जनालोके तुलसी काष्ठ बन्हिना ॥ अथ तुलसी पत्र धारणे माहात्म्यम् स्कांदे ॥ यस्य नाभिस्थितं पत्रं मुखे शिरसि कर्णयोः ॥ तुलसी संभवं नित्यं तीर्थैस्तस्य मखैश्च किम् ॥ यः कश्चिद्वैष्णवो लोके मिथ्या चारोप्य नाश्रमी ॥ पुनाति सकलान् लोकान् शिरसा तुलसीं वहन् ॥ बृहन्नारदीये ॥ कर्णे न धारये द्यस्तु तुलसीं सततं नरः ॥ तत्काष्ठं वापि राजेंद्र तस्य नास्त्यु पपातकम् ॥ तुलसीदल संमिश्रं यस्तोयं शिरसा वहेत् ॥ सर्वतीर्थाभिषिक्तः स्यात्तेन प्राप्तं फलं ध्रुवम् ॥ तुलसीं प्राप्य यो नित्यं न करोति समार्चनं ॥ तस्याहं प्रतिगृह्णा

मिन पूजांद शवार्यिकीम् ॥ वर्ज्य पर्युषितं तोयं वर्ज्यं प
र्युषितं दलम ॥ नवर्ज्यं जान्हवीतोयं न वर्ज्यं तुलसीद
लम् ॥ तुलसीपत्र माद्रायय: करोतिमम अर्चने ॥ नपु
नर्यो निमाप्नोति मुक्ति भागी भवेद्विज: ॥ नमंजरिद
लैर्युक्तं तुलसी सम्भवै: क्षितौ ॥ कुर्वन्तिपूजनं विष्णो स्तेकृ
तार्था: कलौयुगे ॥ विष्णुरहस्ये ॥ कृष्णावाप्यथवा कृष्णा
तुलसी कृष्णवल्लभा ॥ सितावाप्यथवा कृष्णा द्वादशी
वल्लभाहरे: तावद्गर्जन्ति रत्नानि कौस्तुभादीन्यहर्निशं
॥ यावन्न प्राप्यते कृष्णातुलसी पत्रमंजरी नारदीये ता
वद्गर्जन्ति पुष्पाणि मालत्यादीनि भूसुर ॥ यावन्न प्रा-
प्यते पुण्या तुलसी कृष्णवल्लभा ॥ अगस्त्य संहिताया
म ॥ पूर्वमुग्रंतप: कृत्वा वरंव व्रेमनस्विनी ॥ तुलसी सर्व
पुष्पेभ्य: पत्रेभ्यो वल्लभा तत: ॥ पाद्मे ॥ सत्वंप्रीति करं वा
चकं कोपस्तस्यास्तु तामस: ॥ भावद्वयं हरौजातं यत्त
द्वर्णद्वयं स्वभूत ॥ श्यामापि तुलसी विष्णो: प्रिया गौ-
री विशेषत: ॥ यथा लक्ष्मी प्रियाविष्णोस्तुलसी चततो
धिका ॥ स्कांदे ॥ यत्फलं सर्वपुष्पेषु सर्वपत्रेषु नारद ॥
तुलसीदल मात्रेण प्राप्यते केशवार्चने ॥ वर्णाश्रमेतरा
णांच पूजा चाप्यैव साधनम् ॥ अपेक्षितार्थदं नान्यज्ज
गत्यस्मि तपोधन ॥ पापहारित्वं पाद्मे ॥ श्रीमत्तुलस्या-
र्चयतेस कृद्धरिं पत्रैस्सुगंधैर्विमलैरखंडितै: ॥ यस्तस्य

पापं पदसंस्थितं प्रभुर्निरीक्ष्य चित्ता मृज्यतेस्वयं य मः॥स्कां
दे॥ तुलसीदल लक्षेणयोर्चयेत द्वारकाप्रियम्॥ जन्मा
युत सहस्रस्य पापस्य कुरुते क्षयम्॥स्कांदे॥ किंक
रिष्य तिसंरुष्टोयमो पिसह किंकरैः॥ तुलसीदलेनदे
वेशः पूजितो येनदुःखहा॥ अगस्त्य संहितायांच॥
नतस्य नरक क्लेशोयो ऽर्चयेत्तुलसीदलैः॥ पापिष्ठो
वाप्य पापिष्ठः सत्यं सत्यं न संशयः॥ तीर्थयात्रादि
भिरहोकाल क्षेपेण किंजनाः ये ऽर्चयंतिहरे र्बिम्बं तु-
लसीदल कोमलैः॥ अगस्त्य संहितायांच॥ पुष्पांतरै
रंतरितंनिर्मितं तुलसीदलैः॥ माल्यंमलय जालिप्तं
दद्याच्छ्रीराम मूर्द्धनि॥ किंतस्य बहुभिर्यज्ञैः संपूर्ण वर
दक्षिणैः॥ किंतीर्थ सेवयादानैरुग्रेण तपसा पिवा॥ अग
स्त्यसंहितायाम्॥ पत्रं पुष्पं फलं चैवश्री तुलस्याःस
मर्पितम्॥ रामायमुक्ति मार्गस्य द्योतकं सर्वसिद्धिदम्
॥गारुडे॥ तावद्भ्रमति संसारे विमूढः कलिवर्त्मनि॥
यावन्नाराधयेद्देवं तुलसीभिः प्रयत्नतः॥ तत्रैवश्री
भगवदुक्तौ॥ तुलसी पत्रमादायय: करोति समर्चनम्
॥नपुनर्योनिमायाति मुक्ति भागीभवेन्नरः॥ अगस्त्य
संहितायाम्॥ तुलसीपत्र मादाय यो ऽर्चयेद्राम मंदिरे
सयाति शाश्वतं ब्रह्मपुनरा वृत्ति दुर्लभम्॥ तुलसी
कुसुमैर्वा मालया भ्यर्च्य जनार्दनम्॥ नरो याति

Digitized by Google

कालादर्शः ४२ एकादशीमीमांसा ४३ कालनिर्णयः ४४॥ दानविवेकः ४५ ब्राह्मणसर्वस्व ४६ कालमाधवः ४७ कृत्यरत्नावली ४८ दानहारावली ४९ शान्तिचिंतामणि ५०॥ पुरुषार्थचिंतामणिः ५१ जयसिंहकल्पद्रुमः ५२ जगद्रेमोदयः ५३ मदनप्रदीपः ५४ शौनककारिका ५५ दिनकरोद्योतः ५६ सरोजसुन्दरः ५७ मर्यादासिंधुः ५८ सर्वसंग्रहः ५९ माधवकारिका ६० विधानपारिजातः ६१ हरिभक्तिभास्करः ६२ हरिभक्तिविलासः ६३ एकादशीतत्वम् ६४॥ रामार्चनचंद्रिका ६५ अथ तुलसीवनपूजाविधिः॥ प्रागद्त्वार्घ्यं ततोऽभ्यर्च्य गंध पुष्पाक्षतादिना॥ स्तुत्वाभगवतीं तांच प्रणमेत्साष्टांगदंडवत तत्रार्घ्यमंत्रः॥ वैष्णवामृतेव्यासः॥ श्रियः श्रिये श्रिया वासे नित्यं श्रीधरसत्कृते॥ भक्त्या दत्तं मया देवि गृहाणार्घ्यं नमोस्तुते॥ पूजामन्त्रः॥ निर्मितात्वं पुरादेवै रर्चितात्वं सुरासुरैः॥ तुलसीहरमेपापं पूजांगृह्णनमोस्तुते॥ स्तुतिश्च॥ मनः प्रसादजननी सुखसौभाग्यवर्द्धिनी॥ आधिव्याधि हरी नित्यं तुलसीत्वंनमोस्तुते॥ प्रार्थना॥ श्रियंदेहि यशोदेहि कीर्तिमायुस्तथासुखं॥ बलंपुष्टिं तथाधर्मं तुलसी त्वंप्रयच्छमे॥ प्रणामवाक्यं आवंतीखंडे॥ यादृष्टा निखिलाघसंघ शमनी स्पृष्टावपुः पावनी रोगाणामभिवंदिता निरसनी सिक्तांतक त्रासिनी॥ प्रत्यासत्ति विधायिनी

भगवतः कृष्णस्य संरोपिता न्यस्तात्तत्त्वशो विमुक्ति फल
दात्तस्यै तुलस्यैनमः॥ अथतुलसी पूजा माहात्म्यं स्कांदे
॥प्रयागस्नान निरतो काश्यां प्राणविमोक्षणे ॥ यत्फलं
विहितं वेदैस्तुलसी पूजनेनतत् अगस्त्य संहितायां च
तुर्णामपि वर्णानामाश्रमाणां विशेषतः॥ स्त्रीणां पुरु
षाणांच पूजितेष्टं ददातिहि॥ तुलसीरोपिता सिक्ताध्यष्टा
स्पृष्टाच पावयेत् आराधिता प्रयत्नेन सर्वकाम फलप्र-
दा॥ प्रदक्षिणां भ्रमित्वायेन मस्कुर्वंतिनित्यशः नतेषां
दुरितं किंचिदक्षीणमव शिष्यते॥ बृहन्नारदीये॥ पू
ज्यमानाच तुलसीयस्य वेश्मनि तिष्ठति॥ तस्यसर्वा-
णि श्रेयांसि वर्द्धन्तेहर हर्द्विज॥ पाद्मे॥ पक्षे पक्षेतु
संप्राप्ते द्वादश्यां वैश्यसत्तम॥ ब्रह्मादयोपि कुर्वंतितुल
सीवन पूजनम॥ श्रीतुलसीस्तुतिमहिमा॥ अनन्यमन
सानित्यं तुलसीं स्तौतियोनरः॥ पितृदेव मनुष्याणांप्रियो
भवति सर्वदा॥ अथतुलसी वनमाहात्म्यम्॥ स्कान्दे॥
रतिंव ध्नाति नान्यत्र तुलसीकाननं विना॥ देवदेवो
जगत्स्वामी कलि काले विशेषतः॥ नधात्री सफलायत्र
नविष्णुस्तुलसी वनम्॥ तन्म्लेच्छ सदृशंस्थानंयत्र
नायांति वैष्णवाः॥ केशवार्थेक लौयेतुरोपयं तीह भूत-
ले॥ किंकरिष्यत्य संतुष्टो यमोपिसहं किंकरैः॥ तुल
स्यारोपणं कार्यं श्रवणेन विशेषतः अपराधसहस्राणि

क्षम त्ते पुरुषोत्तमः ॥ घटैर्यंत्रघटी भिर्यसिं चित्तंतु
लसी वनं ॥ जलधारा भिर्विप्रेंद्र प्रीणितं भुवन त्रयम् ॥
तुलसी गंधमादाय यत्रगच्छति मारुतः ॥ दिशोदशाव
पूताः स्युर्भूत ग्रामश्चतुर्विधः तुलसीकाननो द्भूत च्छा
यायत्र भवेद्द्विज ॥ तत्र श्राद्धं प्रदातव्यं पितृणांतस्मिंहि
तवे ॥ तुलसी वीज निकरः पतते यत्र नारद ॥ पिंडदा-
नं कृतं तत्र पितृणांदत्तम क्षयम ॥ दृष्टास्पृष्टातथा
ध्यातांकीर्तितानमिताश्रुता ॥ रोपितासेविता नित्यंपू
जिता तुलसी शुभा ॥ नवधातुलसीं नित्यंये भजंति
दिने दिने ॥ युगकोटिसहस्त्राणि ते वसं तिहरे र्गृहे
रोपिता तुलसी यावत्कुरुते मूलविस्तरं ॥ तावत्कोटि
सहस्त्रं तुतनोति सुकृतंकलौ ॥ यावच्छाखा प्रशा
खाभिर्वीज पुष्पैः फलैर्मुने ॥ रोपिता तुलसीपुंभिर्वर्द्ध
तेवसु धातले ॥ कुलेतेषांतु ये ज्ञाताये भविष्यंतिये
मृताः ॥ आकल्पं युगसाहस्त्रं तेषांवासो हरेर्गृहे ॥ तु
लसीयेवि चिन्वंति धन्यास्ते तत्कर पल्लवाः ॥ केशा
वार्थे कलौयेच रोपयंतीह भूतलेपाप्ने ॥ नपश्यंतिय
मं वैश्य तुलसी वनरोपणात ॥ सर्व पाप हरं सर्व काम
दंतुलसी वनम ॥ तुलसी कानने वैश्य गृहे यस्मिंस्तुति
ष्ठति ॥ तद्गृहं तीर्थ भूतंहि नायांति यम किंकराः ॥ ता
वद्वर्ष सहस्त्राणि या वद्वीज दलानिच ॥ वसंति देव

लोकेतु तुलसीं रोपयंतिये ॥ तुलसी गंधमाघ्रायपितरस्तु
ष्टमानसाः प्रयांतिगरुडा रूढास्तत्पदं चक्रपाणिनः ॥ अ
श्ववृक्ष सहस्रेण पिप्पलानां शतेनच ॥ यत्फलं हितदे के
नतुलसी विटपेनतु ॥ विष्णुपूजन संयुक्तस्तुलसीं यस्तु
रोपयेत् ॥ युग युतदशे कंसोपकोरमते दिवि ॥ पुष्करा
दीनितीर्थानि गंगाद्याः सरितस्तथा वासुदेवादयो देवा
वसंति तुलसीदले ॥ नावज्ञा जातु कार्यास्या वृक्षभा-
वान्मनीषिभिः ॥ यथाहिवासुदेवस्य वैकुंठभोग विग्रहः ॥
शालग्राम शिलारूपं स्थावरंभु विदृश्यते ॥ तथालक्ष्मै
कदेशापन्ना तुलसीभोग विग्रहा ॥ अपरंस्था वरूपं भुवि
लोक हितायवै ॥ अगस्त्य संहितायाम ॥ विष्णोस्त्रैलो-
क्यनाथस्य रामस्यजन कात्मजा ॥ प्रियातथैव तुलसी
सर्वलोकैक पावनी ॥ तुलसी वाटिका यत्रपुष्पां तरशा
तावृत्ता ॥ शोभतेराघ वस्तत्र सीतयासहितः स्वयम ॥ तु
लसी विपिनस्यापि समंता त्पावनं स्थलं ॥ कोशमात्रं
भवत्येव गांगेयस्येव पाथसः तुलसीसन्निधौप्राणान् ये
त्यजंतिमुनीश्वर ॥ नतेषां नरकक्लेशाः प्रयांति परमं प-
दम ॥ अनन्यदर्शनाः प्रातर्ये पश्यंति तपोधन ॥ अहोरा
त्र कृत्तं पापंतत्त क्षणात्प्रहरंतिते गारुडे तुलसी कानने
यस्तु मुहूर्तमपि विश्रमेत् ॥ जन्म कोटि कृतात्पापान्मु
च्यते नात्रसंशयः ॥ स्कंदावि तुलसी मूलाद्यावन्त्य

तनुंत्यक्त्वा वैष्णवींशाश्वतींगतिम् ॥ योर्चयेद्धरिपादाब्जं
तुलसी कोमलच्छदैः ॥ नतस्य पुनरावृत्ति र्ब्रह्मलोका
त्कदाचन ॥ ब्राह्मे ॥ तुलसीदल गंधेन मालतीकुसुमेन
च ॥ कपिलाक्षीर दानेन सद्यस्तुष्यति केशवः ॥ का
र्त्तिकादौफल विप्रोयस्तत्र ॥ कार्त्तिके गारुडे ॥ गवाम
युत दानेनय त्फलंलभतेरवग ॥ तुलसीपत्रकै केनतत्फ
लंकार्त्ति केस्मृतम ॥ अथमाघेस्कांदे ॥ स्नात्वामहान
दी तोये कोमलैस्तुलसी दलैः ॥ यो ऽर्चयेन्माधवं मा
घे कुलानां तारयेच्छतम ॥ वैशाखेपाद्मे ॥ तुलसीगो
र कृष्णाख्या तया भ्यर्च्यमधु द्विषं ॥ विशेषेण तुवैशा
खेनरो नारायणो भवेत ॥ स्कांदे ॥ संपूज्य तुलसीभ-
क्त्याघनश्यामं जनार्दनं ॥ चतुरोवार्षिकान्मासान ब्व्रस
धायुतंलभेत ॥ वायुपुराणे ॥ अस्नात्वातुलसीं छित्वायः पू
जांकुरुतेनरः सो ऽपराधीभवेत्सत्यं तत्सर्वं निष्फलंभवेत्त
॥ तत्रादौमंत्रः ॥ स्कान्दे ॥ तुलस्यमृत जन्मासिसदात्वं
केशवप्रिया ॥ केशवार्थे चिनोमित्वां वरदाभवशोभने
त्वदंगसंभवैः पत्रैःपूजयामियथाहरिम् ॥ तथाकुरु पवि
त्रांगिकलौमल विनाशिनि ॥ गारुडे ॥ मोक्षैकहेतो धर-
णीप्रशस्ते विष्णोः समस्तस्यगुरोः प्रियेत्ति ॥ आराध
नार्थं वरमंजरी कलुनामि पत्रं तुलसीक्षमस्व ॥ इत्युक्त्वा
तुलसींनत्वाछित्वादक्षिण पाणिना ॥ पत्राणिवै ५

कर्णोन्यस्येत्सत्माद्वे मंजरीरपि॥ तन्माहात्म्यं स्कान्दे॥
मंत्रेणानेनयः कुर्याद्गृहीत्वा तुलसीदलं पूजनं वासुदे-
वस्य लक्षकोटि फलंलभेत्॥ शालग्रामशिला र्चार्थं
प्रत्यहं तुलसीक्षितौ॥ तुलसीयेवि चिन्वंति धन्यास्ते
करपल्लवाः॥ संक्रांत्यादौनिषिद्धेपितु लस्यवचयः
स्मृतौ॥ परंश्रीविष्णु भक्तैस्तु द्वादश्यामे चनेष्यते॥
अथतुलस्य वचय निषेधकालः विष्णुधर्मोत्तरे॥ नछिं
द्यात्तुलसीं विप्राद्द्वादश्यां वैष्णवः क्वचित्॥ गारुडे॥
भानुवारंविनादूर्वां तुलसीं द्वादशींविना॥ जीवितस्य
विनाशायन विचि न्वीतधर्मवित्॥ पाद्मेच॥ द्वादश्यां
तुलसीपत्रं धात्रीपत्रंच कार्तिके॥ लुनातिसनरोगच्छेन्नि
रयानति गर्हितान्॥ देवार्थे तुलसीच्छेदोहोमार्थेसमि-
धांतथा॥ इंदुक्षयेन दुष्येत गवार्थेतु तृणस्यच सर्वेषां-
पत्राणांमध्ये तुलसीपत्रस्य श्रेष्ठत्वमाह॥ नारसिंहे॥
पत्राण्य पिसुपुण्यानि हरिप्रीतिकराणिच॥ प्रवक्ष्या
मि नृपश्रेष्ठ शृणुष्व गदतोमम॥ अपामार्गेतु प्रथमंभृं
गराजंततः परं॥ ततस्तु मालपत्रं चततश्चशमिपत्र
कम॥ दूर्वापत्रं ततः श्रेष्ठं ततोपि कुशपत्रकम्॥ तस्मा
दामलकं श्रेष्ठंततो बिल्वस्य पत्रकम्॥ बिल्वपत्राद
पिहरेस्तुलसी पत्र मुत्तमम्॥ अथतुलस्यर्पण नित्य
तापाद्ये॥ तुलसीनयेयां हरि पूजनार्थं संपद्यते ९-

माधवपुराणवासरे धिग्यौवनं जीवनमर्थसंततिं तेषांसु खंनेहचहृश्यत्तेपरे ॥ गारुडे ॥ तुलसीं प्राप्ययो नित्यं नकरोतिम मार्चनं ॥ तस्याहं प्रतिगृण्हामि न पूजांश तवार्षि कीम् ॥ बृहन्नारदीये ॥ यद्गृहेनास्ति तुलसी शालग्राम शिलार्चने स्मशान सदृशं विद्यात्तद्गृहं शुभवर्जितम् ॥ वायुपुराणे ॥ तुलसीरहिता पूजां न गृण्हाति सदाहरिः काष्ठंवा स्पर्शयेत्तत्र नोचेन्नामत यजेत् ॥ तुलसीदलमादाय योऽन्यंदेवं प्रपूजयेत् ॥ ब्र ह्म हासहिगोघ्रश्च सएवगुरु तल्पगः ॥ गारुडेनैवेद्य प्रसंगे ॥ तुलसीदल संमिश्रं हरेर्दद्यच्चयत्सदा ॥ अथ तुलसीदल भक्षण माहात्म्यम् गारुडे सित्ता सितं य थानीरं सर्वपापक्षया वहम् ॥ तथाच तुलसीपत्रं प्राशि तंसर्वकामदम् ॥ चांद्रायण सहस्रस्य पराकाणां शतस्यच ॥ नतुल्यंजायते पुण्यं तुलसी पत्रभक्षणात् ॥ कृत्वापाप सहस्राणि पूर्ववय सिमानवः ॥ तुलसी भक्षणान्मुच्येच्छ्रुतमे तत्सुराहरेः श्रीमत्तुलस्याः पत्र स्य माहात्म्यंयद्यपी दृशम् ॥ तथापि वैष्णवैस्तन्नग्रा सं कृष्णार्पणं विना अथतुलसीमूल मृत्तिका पुंड्रमा- हात्म्य ॥ तुलसीमृत्तिका पुंड्रंललाटे यस्य दृश्यते ॥ देहंनस्पृशते पापं क्रियमाणंतु नारद ॥ गरुडपुरा णे ॥ तुलसीमृत्तिका पुंड्रंयः करोति दिनेदिने ॥ तस्या

वलोकनात्पापं यातिवर्षकृतं नृणाम् ॥ श्रीमद्राम सखे
द्रस्यपाद पद्म प्रसादतः ॥ बुधसंमतियुक्पूर्णस्तुलसी
तत्वभास्करः १ नारायण समारंभा पाराशर्यादि मध्य
मां ॥ अस्मदाचार्य पर्यंतां वंदेगुरु परंपराम् २ इतिश्री
सीताराम कृपापात्र सीतारामीय परमहंस परिव्राज
क हरिहर प्रसाद विरचितस्तुलसी तत्वभास्करः समाप्तः

Digitized by Google